No. १०३२-घ

Title १: गणपतिकवचं "वज्रपञ्जरः"
२: स्कन्द पुराणे शिव कवचम्

Author

Extent १+१=२ पत्र 2 Age

१- २

Subject तन्त्र । (पुराण [illegible])
(१) २

गणेशकवचम्
(स्कन्द पुराणे)
शिवकवचम्

१०३२

2पत्र

नं. १०३२-क-१
गणपतिकवचं वज्रपञ्जरः

श्रीगणेशायनमः ॐ श्रीभैरवौवाच महादेवीगणेशस्यवरदस्यमहात्मनः
कवचंतेप्रवक्ष्यामिवज्रपंजरकाभिदं ॐ अस्यश्रीमहागणपतिवज्रपंज
रकवचस्य श्रीनारदऋषिः गायत्रीछंदः श्रीमहागणपतिर्देवता गंबीजं
ह्रींशक्तिः कुरुकीलकं आत्मनोःवाङ्मनःकायोपार्जितपापनिवारणार्थे ॥
श्रीधर्मार्थकाममोक्षार्थेवज्रविद्यासिद्ध्यर्थेमहागणपतिवज्रपंजरकव
चपाठेविनियोगः अथगायत्री तत्पुरुषायविद्महेवक्रतुंडायधीमहि त
न्नोदंतिप्रचोदयात् ३ अथध्यानम् ॐविघ्नेशंविश्ववंद्यंसुविपुलयशा
संलोकरक्षाप्रदक्षं साक्षात्सर्वापदाशप्रशमनसुमतिंपार्वतीप्राणसूनुं।
पायात्सर्वान्सुरेंद्रासुरवरमुनिगणैःसाधकैःपूज्यमानं कारुण्येनांतरा
याभितभयशमनंविघ्नराजंनमामि ॐश्रीह्रींगंशिरःपातुमहागणपति
प्रभु विनायकोललाटंमेविघ्नराजोभ्रुवौमम पातुनेत्रेगणाध्यक्षोनासि
कामेगजाननः श्रुतीमेवतुहेरंबोगंडौमेमोदकाशनः द्वैमातरोमुखंपातु
चाधरौपातुरंदमः दंतांममैकदंतोव्याद्वक्रतुंडोवताद्रसां नांगेयोमेगलंपा
तुस्कंदौसिंहासनोवतु विघ्नांतकोभुजौपातुहस्तौमूषकवाहनः उरोननना
वतान्नित्यंदेवास्त्रिपुरघातनः हृदयंमेकुमारोव्यात्दृयंतोपार्श्वंउमकं ॥

ग० प्रद्युम्नो मेवतात्स्कंधं नाभिं त्र्यंबकनंदनः कटिं नंदगणः पातु शिश्नं वीरेश्वरोवतु।
१ मेढ्रं मेवतु सौभाग्यो भृंगिरीटी च गुह्यकं विराटकोवतादूरू जानुमे पुष्पदंतकः
जंघे मम विकालौ स्याद्गुल्फौ वत्स्यगुणोवतु पादौ चित्तगणः पातु पादाधो लो-
हितोवतु पादपृष्ठं सुंदरो स्यान्नूपुराद्यो वपुर्मम विदारोजठरं पातु भूतानि चो-
ग्ररूपकः शिरसः पादपर्यंतं वपुः सप्तगणोवतु पादादिमूर्ध पर्यंतं वपुः पातु
नुचिंतकः विस्मारितं तु यत्स्थानं गणेशास्तत्सदावतु पूर्वे मां ह्रीं करालो व्यादा-
ग्नेये विकरालकः दक्षिणे पातु संहारो नैरृते रुरुभैरवः पश्चिमायां महाका-
लो वायौ कालाग्निभैरवः उत्तरे मां सिमाव्याद् ईशान्यामपिताल्मकः प्रभाते
शतपत्रो व्यात्सहस्रारस्तु मध्यमे दंतमाला दिनांते व्यान्निशापात्रं सदावतु क-
लत्रं मां निशीथौ व्यान्नित्रां ते परसुस्तथा सर्वत्र सर्वदा पातु त्रैःस्वसुर्ममस-
दावतु ओं ओं राजकुले हहो रणभये ह्रीं ह्रीं हुघूते वतात् श्रीं श्रीं शत्रुगृहे शौ-
जलभये क्लीं क्लीं वनांते वतु ग्लौं ग्लं ग्लें ग्लीं सत्वभीतिषु महाव्याध्यार्तिषु
ग्लैं गगौ नित्यं पक्षपिशाचभूतफणिषु ग्लौं गं गणेशोवतु इतीदं कवचं पु-
ण्यं सर्वतंत्रेषु गोपितं वज्रपंजरनामानं गणेशस्य महात्मनः अंगभूतं तंत्र
मयं सर्वाचारैकसाधनं विधानेन न सिद्धिः स्यात्सजनस्य जपस्य च तस्मात् १

पठनं पुण्यं पठेद्वा धारयेत्सदा तस्य सिद्धिर्महादेवि करस्था पारलौकिकी यं
यं कामयते कामं तं तं प्राप्नोति पाठकः अर्धरात्रे पठेन्नित्यं सर्वाभिष्टफलं ल
भेत् इति गुह्यं सुकवचं महागणपतेः प्रियं सर्वसिद्धिमयं पुण्यं गोपयेत्पर
मेश्वरी इति श्रीगणेशकवचं संपूर्णं ३० ॥ ॐ नमः शिवाय ओं अस्य श्री
शिवकवचस्तोत्रमंत्रस्य श्रीब्रह्मा ऋषिः गायत्र्यं छंदः श्रीसदाशिवो देवता
रां बीजं रीं शक्तिः रूं कीलकं आत्मनोः वाङ्मनः कायोपार्जितपापनिवारणा
र्थे मम रुद्रसाक्षात्कारे शिवकवचपाठे विनियोगः अथ गायत्री ॐ तत्पुरुषा
य विद्महे महादेवाय धीमहि तन्नो रुद्र प्रचोदयात् अथ ध्यानं ॐ वंदे रुद्र
उमापतिं सुरगुरुं वंदे जगत्कारणं वंदे पन्नगभोशनं शिवधरं वंदे पशूनांप
तिं वंदे सूर्यशशांकवह्निनयनं वंदे मुकुंदप्रियं वंदे शैलसुतामनोहरतरं वंदे
शिवं शंकरं ॐ सकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर
त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल
लोकनिगमगुह्याय सकललोकवरप्रदाय सकलदुःखार्त्तिभंजनाय सक
लजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्वतनि
जावासाय निर्गुणाय निरुपमाय निराभासाय निरामयाय निःष्प्रपंचाय

त्रि॰ निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निरूपमविभवाय निराधाराय
२ नित्यशुद्धपरिपूर्णसच्चिदानंदाय परमशांतप्रकाशतेजोरूपाय जयजय रुद्र रु
द्र महारौद्र वीरभद्रावतार महाभैरव कल्पांतभैरव कालभैरव कपालमालाध
र खड्ग खट्वांग चर्म पाशांकुश डमरू त्रिशूल चाप बाण गदा शक्तिः भिंडिपाल
तोमर समुद्गर मुद्गर प्रास पाश परिघ पट्टिस भुसुंडी शतघ्नी चक्रायुध भीषण
कर सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फूर्जित ब्रह्मांडमंडल नागेंद्रकुं
डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक
विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्व
तो रक्ष २ ज्वल २ महामृत्युंजय २ अपमृत्युभयं नाशय २ रोगभयमुत्सादय २
विषसर्पभयं शमय २ चोरान्मारय २ मम शत्रूनुच्चाटय २ त्रिशूलेन विदार
य २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथय २ मुसलेन निःशेष
य २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि विद्रावय २ कूष्मांडवेताल ना
रीगण ब्रह्मराक्षसान् संत्रासय २ ममाभयं कुरु २ वित्रस्तमाश्वासय २ नरक
भयान्मामुद्धर २ संजीवय २ क्षुत्तृडार्तिं निवारय २ दुःखातुरमानंदय २ शिव २
कवचेन मामाच्छादय २ त्र्यंबक नमस्ते २ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शि
वकवचं संपूर्णम् शुभं भवतु १९ ॥